# संस्कृतवार्ता:

दिनाङ्क : 21/07/2025 सायम् - 06:20

<u>आदौ-मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्रमोदी संसदः प्रावृट्-सत्रं देशस्य सामूहिकोपलब्धीनां वास्तविकोत्सवः इति ब्रूवन् आपरेशन् सिन्दूरेति काले पूर्णविश्वेन भारतस्य सैन्यशक्तिः दृष्टा इत्यपि उक्तवान् ।
- प्रशासनेन प्रतिपादितं यत्, ए. आई.- 171 विमानदुर्घटनायाः अन्वेषणं ए. ए. आई.बी. इत्यनेन पारदर्शकतया क्रियते।
- ढाका-नगरे बाङ्ग्लादेश्-वायुसेनायाः विमानं मैल्स्टोन्-महाविद्यालये अपतत् न्यूनातिन्यूनं नवदश-जनाश्च मृताः।
- ऋतुविज्ञान-विभागेन अद्य जम्मू-कश्मीर्-हिमाचलप्रदेशयोः वर्षायै रेड्-अलर्ट् इति दक्षिण-ओडिशा-झारखण्ड-छत्तीसगढ-राज्येभ्यश्च ऑरेञ्ज्-अलर्ट् इति सञ्चेतना प्रदत्ता।
- अद्य कैरो-नगरे आरब्धे विश्व-कनिष्ठ-स्क्वाश्-चैम्पियनशिप इति क्रीडायां स्क्वाश्-क्रीडायाः किशोर क्रीडकः अनाहतसिंहः भारतीयदलस्य नेतृत्वं करोति।

-----------------------------------------------------

<u>पीएम-प्रावृट् सत्रम्</u>

अद्य संसदः प्रावृट्-सत्रस्य आरम्भः अभवत्। प्रधानमन्त्रिणा नरेन्द्रमोदिना आशा प्रकटिता यत् सत्रमिदं सफलं चर्चाभिश्च समृद्धमपि भवेत्, येन देशस्य लोकतन्त्रं सुदृढं भविष्यति। अद्य प्रातः संसदः बहिः, सत्रारम्भात् प्राक्, प्रसारमाध्यमान् सम्बोधयन् प्रधानमन्त्री अवदत् यत्, सत्रमिदं राष्ट्राय गौरवाभिवर्धकमस्तीति ।

प्रधानमन्त्री अवदत् यत्, सम्पूर्णविश्वेन भारतस्य सैन्यशक्तेः क्षमता दृष्टा । सः अवदत् यत्, **ऑपरेशन् सिन्दूर** इति काले, भारतीयसैनिकाः शतप्रतिशतं सफलतया स्वलक्ष्यं प्राप्तवन्तः, आतङ्कवादस्य सूत्रधाराश्च तेषां गुप्तस्थानेष्वेव ध्वंसत्वं अलभन्।

प्रधानमन्त्री मोदी अवदत् यत्, दल-स्तरादुपरि उत्थाय, प्राधान्येन राष्ट्र-हिताय अधिकांश-राजनैतिक-दलानां प्रतिनिधयः विभिन्नानां देशानां भ्रमणम् अकुर्वन्, अन्ताराष्ट्रिय-मञ्चे पाकिस्तानस्य भूमिकाञ्च उद्घाटयितुं सामूहिकरूपेण अत्यन्तप्रभावशालिनः अभियानस्य नेतृत्वम् अकुर्वन्निति । प्रधानमन्त्रिणा अग्रे प्रोक्तं यत्, भारते आतङ्कवादस्य नक्सल्-मतस्य वा अनेके हिंसात्मक-समाह्वनानि जातानि, परन्तु अद्य नक्सल्-मतस्य माओ-मतस्य च प्रभावः द्रुतगत्या सङ्कुचितः भवन्नस्ति । सः अवदत् यत्, अतीतस्य रक्तमार्गः अधुना वृद्धेः विकासस्य च हरितक्षेत्रेषु परिवर्तते। अद्य भारतं द्रुतगत्या अग्रे गमिष्यति इत्यपि सः अवदत् ।

सम्पूर्णराष्ट्रे वर्तमानकाले ऋतोः स्थितिः अनुकूलतया प्रगतिं कुर्वन्ती अस्ति, येन कृषिकार्यार्थं लाभप्रदं पूर्वानुमानं प्राप्यते इति प्रकाशयन्, प्रधानमन्त्री अवदत् यत् वर्षाकालः नवान्वेषणस्य नवीकरणस्य च प्रतीकः अस्तीति ।

-------------------------------------------------------

<u>राज्यसभा- नायडू एआई 171:</u>

केन्द्रीय-नागरिक-विमानयान-मन्त्री के. राममोहन-नायडुः अवदत् यत् विमान-दुर्घटना-अन्वेषण-विभागः ए. ए. आई. बी. इत्यन्वेषणसंघः, ए. आई-171 इति विमान-दुर्घटनायाः अन्वेषणं पारदर्शकतया कुर्वन् अस्ति। श्री-नायडुः अवदत् यत् प्रासङ्गिक-अन्ताराष्ट्रिय-विशेषज्ञानां हितधारकाणाञ्च सहभागित्वेन अन्ताराष्ट्रिय-मानदण्डानुसारं एषा प्रक्रिया कठोरतया सम्पाद्यते इति।

-------------------------------------------------------

<u>बाङ्ग्लादेश-विमान-दुर्घटना</u>

बाङ्ग्लादेशस्य ढाकानगरे बाङ्ग्लादेश-वायुसेनायाः प्रशिक्षणविमानं मैल्स्टोन्-महाविद्यालयस्य परिसरे अपतत्, विमानस्य चालकसहितं न्यूनातिन्यूनं नवदशजनाः मृताः। ढाका-नगरस्थेन अस्मत्वार्ताहरेण निगदितं यत् बाङ्ग्लादेश-वायुसेनायाः एफ़्7 इति विमानम् अपराह्ले प्रायः सार्धैकवादने महाविद्यालयस्य भवने पतितमिति।

-----------------------------------------------------

## <u>संसद्-न्यायाधीशः वर्मा</u>

अद्य संसद्सदस्याः लोकसभायाः अध्यक्षाय ओम बिरला इत्यस्मै न्यायाधीशं यशवन्त वर्मा इत्येनं निष्कासयितुं प्रपत्रमेकं दत्तवन्तः। न्यायमूर्ति-वर्मा इत्यमुं विरुध्य महाभियोग-प्रस्तावे आहत्य पञ्चोन सार्धैकसदस्यैः हस्ताक्षरिताः।

-----------------------------------------------------

## <u>संसदि-कङ्गना</u>

बीजेपीतिदल- सदस्या कङ्गना रनौत इत्येषा विपक्षस्य निन्दाम् कुर्वन्ती उक्तवती यत् विपक्षिणः अराजकत्वं जनयन्ति यतो हि ते संसद-कार्यम् नेच्छन्तीति। संसदः बहिः प्रसारमाध्यमैः सह वार्तालापं कुर्वन्ती सा उक्तवती यत् विपक्षः सभायाः गौरवं न धारयति, संसद: सञ्चालनाय यत् धनं व्ययते तत् व्यर्थं भवतीति।

-----------------------------------------------------

## <u>संसदि-राहुलः</u>

लोकसभायां विपक्षस्य नेता राहुलगान्धी संसदः बहिः संभाष्य आरोपितवान् यत् सर्वकारेण विपक्षस्य सदस्याः सभायां वक्तुं नानुमिताः, केवलं मन्त्रिणः एव सभायां वक्तुं अनुमताः इति।

-----------------------------------------------------

## राज्यसभा-शपथ-श्रद्धाञ्जलयश्च

राज्यसभायाः सभापतिः जगदीप-धनखडः अद्य संसदः उच्चसदनस्य निर्वाचितसदस्यद्वयेन सह नामाङ्कितसदस्याञ्च शपथवचनं कारितवान् । ए. जे. पी. दलस्य बीरेन्द्रप्रसादबैश्यः, आसाम- बी. जे. पी. दलस्य कणाद-पुरकायस्थश्च द्वौ निर्वाचितौ सदस्यौ स्तः। नामाङ्किताः सदस्याः डा. मीनाक्षी जैन, सी. सदानन्दन मास्टर, हर्षवर्धन शृङ्गला च सन्ति। राज्यसभायाः सप्त पूर्वसदस्येभ्योऽपि श्रद्धाञ्जलिः प्रदत्ता, ये सद्यः एव दिवङ्गताः।

-----------------------------------------------------

## बिहार-प्रावृट् सत्रम्

अद्य बिहार-विधानसभायाः प्रावृट्-सत्रारम्भः अभवत् । राज्यस्य सप्तदश-विधानसभायाः अन्तिमः सत्रः लघुः भविष्यति, यत्र जुलाईमासस्य पञ्चविंश- दिनाङ्कपर्यन्तं उभयसदनयोः आहत्य पञ्च उपवेशनानि भविष्यन्ति । अध्यक्षः नन्दकिशोरयादवः अवदत् यत्, निर्वाचने जनानां विश्वासः सर्वोपरि भवति, अपि च स: सर्वान् सदस्यान् बिहारराज्ये आगामिनि विधानसभा-निर्वाचनानि आयोजयितुं साहाय्यं कर्तुं प्रार्थयत् ।

-----------------------------------------------------

## मुम्बई-निर्णय:

बॉम्बे-उच्चन्यायालयेन अद्य षडुत्तरद्विसहस्र-तमवर्षस्य मुम्बई-रेल-विस्फोटन-प्रकरणे निर्णायकसाक्ष्याभावात् द्वादशजनाः दोषमुक्ताः कृता: । न्यायमूर्ती अनिल-किलोर तथा श्याम-चान्डक इत्येतयोः विशेषपीठेन अभियोजनपक्षः अभियुक्तेन अपराधं कृतमिति साधयितुं पूर्णतया असफलः अभवत् इत्युक्त्वा पञ्चभ्यः मृत्युदण्डात् सप्तभ्यश्च आजीवनकारावासदण्डात् मोचिताः। सम्बन्धितेऽस्मिन् प्रकरणे विस्फोटेषु अशीत्यधिकैकशततोधिकाः जनाः मृताः, शतशश्च जनाः व्रणिताः अभवन्। दुर्घटनायाः नवदश वर्षाणामनन्तरं निर्णयोऽयं आगच्छत्।

--------------------------------------------------------

**इस्रायल आक्रमणः**

इस्रायल-सैन्येन दृढीकृतं यत् यमन-देशस्य होदैदा-पोताश्रयः लक्ष्यीकृतः इति। एतेषां क्षेत्राणाम् उपयोगः हौथी-आन्दोलनेन सैन्यप्रयोजनार्थं कृतः इति सैन्यबलस्य आक्षेपोऽस्ति।

--------------------------------------------------------

**भारतीय-ऋतुविज्ञान-विभाग: वर्षा-सञ्चेतना**

भारतीय-ऋतुविज्ञान-विभागेन अद्य जम्मू-हिमाचल-प्रदेशयोः अत्यधिक- वर्षायै रेड-अलर्ट इति रक्तसञ्चेतना घोषितास्ति। दक्षिण-ओडिशा-राज्ये, झारखण्ड-राज्ये, छत्तीसगढ-राज्ये च प्रचण्डवृष्टेः सम्भावनामनुमीय ऋतु-विभागेन नारङ्गवर्णीयसूचना दत्ताऽस्ति। आकाशवाण्या सह वार्तालापं कुर्वन्, ऋतु-विभागस्य वरिष्ठः वैज्ञानिकः आर्. के. जेनामणिः अवदत् यत्, अद्य उत्तरतमिलनाडु-प्रदेशे, आन्ध्रप्रदेशे, तेलङ्गाना-प्रदेशे च प्रचण्डवृष्ट्यै नारङ्गवर्णीया सञ्चेतना दत्ताऽस्ति। राष्ट्रियराजधानीक्षेत्र-दिल्ल्यां दिवसि मेघावृत-आकाशेन सह मध्यमवृष्टिरपि भवितुमर्हति। अत्रान्तरे हिमाचलप्रदेशस्य अधिकांशभागेषु प्रचण्डवृष्टिः प्रचलति।

--------------------------------------------------------

**स्क्वाश्-चैम्पियनशिप**

कैरो-नगरस्य ब्लैक-बॉल-स्पोर्टिंग-क्लब् इत्यत्र अद्यारब्धायां विश्व-कनिष्ठ-स्क्वाश्-चैम्पियनशिप इति क्रीडायां भारतीयदलस्य नेतृत्वं किशोरवयस्क-स्क्वाश्-क्रीडातारकभूतः अनाहतसिंह: करोति। प्रतिस्पर्धा चेयं शनिवासरं यावत् प्रचलिष्यति।

।।इति वार्ता।।